## तृतीया कर्मणि । (४८/३७८२)

कर्मवाचिनि क्तान्ते उत्तरपदे तृतीयान्तं पूर्वपदं प्रकृतिस्वरं भवति । अहिहतः, अहिहतः । [1]वज्रहतः । महाराजहतः । नखनिर्भिन्ना । [2]दात्रलूना । 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ. ५८७) इति अहिरन्तोदात्तो व्युत्पादितः । केचिदाद्युदात्तमिच्छन्ति । [3]वज्रो रक्प्रत्ययान्तः । महाराजष्टच्प्रत्ययान्तः । नास्य खमस्तीति बहुव्रीहौ नकुलनखेति नखशब्दो निपातितः । तेन[4] 'नञ्सुभ्याम्' (६.२.१७२/३९०६) इत्यन्तोदात्तः । दात्रशब्दो दाम्नीशस (३.२.१८२/३१६२) इति ष्ट्रन्प्रत्ययान्तः । कर्मणि इति किम् ? रथेन यातः [5]रथयातः । गत्यर्थत्वात् कर्तरि क्तः ॥

## गतिरनन्तरः । (४९/३७८३)

[6]क्ते कर्मणि इति वर्तते । कर्मवाचिनि क्तान्ते उत्तरपदे गतिरनन्तरः पूर्वपदं प्रकृतिस्वरं भवति । प्रकृतः । प्रहृतः । अनन्तरः इति किम् ? [7]अभ्युद्धृतः । समुद्धृतः । [8]समुदाहृतः । व्यवहितस्य गतेरयं स्वरो न भवति । अनन्तरे पुनरिष्यते । कारकपूर्वस्य तु सति [9]शिष्टत्वात् थाथादिस्वर एव भवति दूरादागतः इति । अनन्तरग्रहणसामर्थ्यादेव कृद्ग्रहणे [10]गतिकारकपूर्वस्यापि (व्या.प. १२६) इत्येतन्नाश्रीयते । कर्मणि इत्येव, प्रकृतः कटं देवदत्तः । थाथादिस्वरापवादो योगः ॥

## तादौ च निति कृत्यतौ । (५०/३७८४)

तकारादौ च तुशब्दवर्जिते निति कृति परतो गतिरनन्तरः [11]प्रकृतिस्वरो भवति । [12]प्रकर्ता । प्रकर्तुम् । प्रकृतिः । प्रकर्ता इति तृन्नन्तः । कृत्स्वरबाधनार्थं वचनम् । तादौ इति किम् ? प्रजल्पाकः । निति इति किम् ? प्रकर्ता । तृजन्तः । कृद्ग्रहणमुपदेशे ताद्यर्थम् । इहापि यथा स्यात्, प्रलपिता । प्रलपितुम् । अतौ इति किम् ? [13]आगन्तुः ॥

## तवै चान्तश्च युगपत् । (५१/३७८५)

तवैप्रत्ययस्यान्त उदात्तो भवति गतिश्चानन्तरः प्रकृतिस्वरः इति एतदुभयं युगपद् भवति । 'अन्वेतवै' (तै.सं. १.४.४५.१) । [14]परिस्तरितवै । [15]परिपातवै । '[16]तस्मादग्निचिन्नाभिचरितवै' (तै. सं. ५.६.३.१) । उपसर्गा आद्युदात्ता अभिवर्जम् (फि. ८१) इत्यभिरन्तोदात्तः । कृत्स्वरापवादो योगः ॥

## अनिगन्तोऽञ्चतौ वप्रत्यये । (५२/३७८६)

अनिगन्तो गतिः [17]प्रकृतिस्वरो भवति अञ्चतौ वप्रत्यये परतः । प्राङ्, प्राञ्चौ, प्राञ्चः । प्राङ्, प्राञ्चौ,

---

1. रुद्रहतः क.ड.ह.फ. 2. दारुलूना ग.ह. 3. रुद्रो क. 4. एव इत्यधिकम् क. 5. इति इत्यधिकम् फ. 6. वाक्यमिदं नास्ति क.ग.फ.ह. 7. अत्युद्धृतः क. 8. समुदाहृतः नास्ति क. 9. शिष्टथाथादित्वात् ह. 10. गतिकारकपूर्वपदस्य कृते ग्रहणे क. 11. पूर्वपद इत्यधिकम् ह. 12. कर्ता कर्तुम् ग.ह. 13. आगन्तुम् ह. 14. परिस्तरीतवै क. 15. परिपातवै नास्ति ह. 16. तस्मात् पिता मुद्रितः पाठः 17. पूर्वपद इत्यधिकम् फ.